শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্॥

## দশক - ৮৫

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৮৫

*জরাসন্ধৱধৱর্ণনং রাজসূযৱর্ণনং চ*

ততো মগধভূভৃতা চিরনিরোধসঙ্ক্লেশিতং
 শতাষ্টকযুতাযুতদ্বিতযমীশ ভূমীভৃতাম্।
অনাথশরণায তে কমপি পূরুষং প্রাহিণো-
 দযাচত স মাগধক্ষপণমেৱ কিং ভূযসা॥ ১ ॥

যিযাসুরভিমাগধং তদনু নারদোদীরিতা-
 দ্যুধিষ্ঠিরমখোদ্যমাদুভযকার্যপর্যাকুলঃ।
ৱিরুদ্ধজযিনোধ্বরাদুভযসিদ্ধিরিত্যুদ্ধৱে
 শশংসুষি নিজৈঃ সমং পুরমিযেথ যৌধিষ্ঠিরীম্॥ ২ ॥

অশেষদযিতাযুতে ত্বযি সমাগতে ধর্মজো
 ৱিজিত্য সহজৈর্মহীং ভৱদপাঙ্গসংৱর্ধিতৈঃ।
শ্রিযং নিরুপমাং ৱহন্নহহ ভক্তদাসাযিতং
 ভৱন্তমযি মাগধে প্রহিতৱান্ সভীমার্জুনম্॥ ৩ ॥

গিরিব্রজপুরং গতাস্তদনু দেৱ যূযং ত্রযো
 যযাচ সমরোৎসৱং দ্বিজমিষেণ তং মাগধম্।
অপূর্ণসুকৃতং ত্বমুং পৱনজেন সঙ্গ্রামযন
 নিরীক্ষ্য সহ জিষ্ণুনা ত্বমপি রাজযুদ্ধ্বা স্থিতঃ॥ ৪ ॥

অশান্তসমরোদ্ধতং ৱিটপপাটনাসংজ্ঞযা
 নিপাত্য জরসস্সুতং পৱনজেন নিষ্পাটিতম্।
ৱিমুচ্য নৃপতীন্ মুদা সমনুগৃহ্য ভক্তিং পরাং
 দিদেশিথ গতস্পৃহানপি চ ধর্মগুপ্ত্যৈ ভুৱঃ॥ ৫ ॥

www.prapatti.com

প্রচক্রুষি যুধিষ্ঠিরে তদনু রাজসূযাধ্ৱরং
প্রসন্নভৃতকীভৱতসকলরাজকৱ্যাকুলম্।
ত্ৱমপ্যযি জগতপতে দ্ৱিজপদাৱনেজাদিকং
চকর্থ কিমু কথ্যতে নৃপৱরস্য ভাগ্যোন্নতিঃ॥ ৬ ॥

ততঃ সৱনকর্মণি প্রৱরমগ্র্যপূজাৱিধিং
ৱিচার্য সহদেৱৱাগনুগতঃ স ধর্মাত্মজঃ।
ৱ্যধত্ত ভৱতে মুদা সদসি ৱিশ্ৱভূতাত্মনে
তদা সসুরমানুষং ভুৱনমেৱ তৃপ্তিং দধৌ॥ ৭ ॥

ততঃ সপদি চেদিপো মুনিনৃপেষু তিষ্ঠতস্ৱহো
সভাজযতি কো জডঃ পশুপদুর্দুরূঢং ৱটুম্।
ইতি ত্ৱযি স দুৰ্ৱচোৱিততিমুদ্ৱমন্নাসনা-
দুদাপতদুদাযুধঃ সমপতন্নমুং পাণ্ডৱাঃ॥ ৮ ॥

নিৱার্য নিজপক্ষগানভিমুখস্য ৱিদ্ৱেষিণ-
স্ত্ৱমেৱ জহৃষে শিরো দনুজদারিণা স্ৱারিণা।
জনুস্ত্রিতযলব্ধযা সততচিন্তযা শুদ্ধধী-
স্ত্ৱযা স পরমেকতামধৃত যোগিনাং দুর্লভাম্॥ ৯ ॥

ততঃ সুমহিতে ত্ৱযা ক্রতুৱরে নিরূঢে জনো
যযৌ জযতি ধর্মজো জযতি কৃষ্ণ ইত্যালপন্।
খলঃ স তু সুযোধনো ধুতমনাসসপত্নশ্রিযা
মযার্পিতসভামুখে স্থলজলভ্রমাদভ্রমীত্॥ ১০ ॥

তদা হসিতমুত্থিতং দ্রুপদনন্দনাভীমযো-
রপাঙ্গকলযা ৱিভো কিমপি তাৱদুজ্জৃম্ভযন্।
ধরাভরনিরাকৃতৌ সপদি নাম বীজং ৱপন
জনার্দন মরুতপুরীনিলয পাহি মামামযাত্॥ ১১ ॥

**********



www.prapatti.com